# Heramba Stuti Ramakrita

# રામકૃતા હેરમ્બસ્તુતિઃ

## Document Information

Text title : Heramba Stuti Ramakrita

File name : herambastutiHrAmakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM tRitIyaH khaNDaH | adhyAyaH 26 | 3.26. 77-89||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# રામકૃતા હેરમ્બસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
રામ ઉવાચ ।
હેરમ્બાય નમસ્તુભ્યં દીનકર્ત્રે કૃપાલવે ।
દીનાનાથસ્વરૂપાણાં કર્ત્રે તે વૈ નમો નમઃ ॥ ૭૭॥
ઈશ્વરાણાં ચ દીનાનામભેદાય ચ તે નમઃ ।
વિઘ્નેશાય ગણાનાં વૈ પતયે તે નમો નમઃ ॥ ૭૮॥
અનાદયે ચ સર્વેષામાદિરૂપાય તે નમઃ ।
અન્તમધ્યપ્રતિષ્ઠાય લમ્બોદર નમો નમઃ ॥ ૭૯॥
ચિન્તામણે ચ ચિત્તાનાં ચાલકાય નમો નમઃ ।
ભેદાભેદાદિહીનાય તદાકારાય તે નમઃ ॥ ૮૦॥
સર્વપૂજ્યાય સર્વાદિપૂજ્યાય પરમાત્મને ।
અનન્તાય પરેશાય ઢુણ્ઢિરાજાય તે નમઃ ॥ ૮૧॥
પૂર્ણાય પૂર્ણનાથાય સ્વાનન્દસ્થાય તે નમઃ ।
સિદ્ધિબુદ્ધિપ્રદાત્રે ચ સિદ્ધિબુદ્ધિવરાય ચ ॥ ૮૨॥
સમર્થાનાં ચ તે ભક્તિહીનાનાં દૈન્યકારિણે ।
દીનાનાં ભક્તિયુક્તાનાં નમઃ સામર્થ્યકારિણે ॥ ૮૩॥
દીનત્વં ચ સમર્થત્વં ત્વદધીનં ન સંશયઃ ।
અતો માં રક્ષ યોગેશ યોગેશાય નમો નમઃ ॥ ૮૪॥
કિં સ્તૌમિ ત્વાં ગણાધીશ શાન્તિયોગસ્વરૂપિણમ્ ।
ન સમર્થાશ્ચ વેદા યં યોગીન્દ્રાસ્તત્ર કોઽપ્યહમ્ ॥ ૮૫॥
રામસ્ય તસ્ય સ્તુવત એવં સમ્ભક્તિભાવિતઃ ।
રોમોદ્ગમઃ પ્રાદુરાસીત્ કણ્ઠરોધસ્તથૈવ ચ ॥ ૮૬॥
તતો ભક્તિરસે મગ્નં રામં વીક્ષ્ય ગજાનનઃ ।
જગાદ તં વરં બ્રૂહિ મનસીપ્સિતમાદરાત્ ॥ ૮૭॥
(ફલશ્રુતિઃ)

હેરમ્બ ઉવાચ ।
ત્વયા કૃતમિદં સ્તોત્રં ભવેન્ મત્પ્રીતિવર્ધનમ્ ।
શાન્તિયોગપ્રદં ચૈવ ભક્તિલક્ષણવર્ધનમ્ ॥ ૮૮॥
યદ્યદિચ્છતિ તત્તદ્વૈ દાસ્યામિ સ્તોત્રપાઠતઃ ।
શ્રવણેન ન સન્દેહઃ પ્રિયો મે સ ભવિષ્યતિ ॥ ૮૯॥

ઇતિ રામકૃતા હેરમ્બસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં તૃતીયઃ ખણ્ડઃ । અધ્યાયઃ ૨૬ । ૩.૨૬। ૭૭-૮૯॥

- .. mudgalapurANaM tRRitIyaH khaNDaH . adhyAyaH 26 . 3.26. 77-89..

Proofread by Yash Khasbage, Preeti Bhandare

*Heramba Stuti Ramakrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*